# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीया परीक्षा - प्रथमपत्रिका

**दिनाङ्कः** – 01-09-2024 **अङ्काः** – १००

**पूर्वाह्णः** – १०:०० तः १:०० पर्यन्तम् **समयः** – होरात्रयम्

ಸೂಚನೆಗಳು: ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1. **पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत ।** 5

    1. गणेशं के कदा नमस्कुर्वन्ति ?
    2. द्रोणाचार्यः कः ?
    3. भोजस्य कस्मिन् महानादर आसीत् ?
    4. शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के ?
    5. विक्रमः फलं कस्मै प्रायच्छत् ?
    6. कृषिं कुर्वता ब्राह्मणेन किं न लब्धम् ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 12

    1. श्रीशङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ?
    2. नव गोप्यानि कानि ?
    3. मल्लस्य सामर्थ्यं विशदयत ।
    4. भुजङ्गमः रोषात् किमकरोत् ? परिणामः किमभवत् ?
    5. पितामहः आत्मानं कथं दर्शितवान् ?
    6. भूतानां प्रलयोदयौ कौ ?
    7. सीता कुत्र कथम् अवर्तत ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत ।** 9

    1. के के त्याज्याः ?
    2. केषां मतिः क्षीयते ?
    3. विष्णोराकारं विवृणुत ।
    4. चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

4. **चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत।** **12**

1. विक्रमस्यौदार्यं विशदयत ।
2. कालिदासेन कृतं समस्यापूरणप्रसङ्गं विवृणुत ।
3. एकलव्यस्य गुरुभक्तिं विशदयत ।
4. पतिव्रतायाः महत्त्वं वर्णयत।
5. शङ्कराचार्यस्य गुरुभक्तिं विशदयत ।

**5. चतुर्णां ससन्दर्भं मातृभाषया विवृणुत।** **12**

1. "प्रभूतधनेन योजयिष्यामि" ।
2. "भो विप्र, नाहं बलाका" ।
3. "कुतो विद्यार्थिनः सुखम्" ।
4. "रणे रावणं हत्वा त्वां नेष्यति" ।
5. "अतिथिसत्कारः श्रेयस्करः" ।

6. **द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत।** **4**

1. तस्मिन्विप्रकृताः काले तारकेण दिवौकसः । तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ॥
2. गते तु रावणे सीतां प्रलपन्तीं स मारुतिः । उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥
3. अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् । वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥

7. **श्लोकद्वयं पूरयत।** **4**

1. प्रथमवयसि -------------- विस्मरन्ति ॥
2. दोर्भिर्युक्ता ----------------------सुप्रसन्ना ॥
3. पौलस्त्यः ------------- मतिः क्षीयते ॥

8. **अस्य गद्यस्य अनुवादं कुरुत।** 3

विक्रमार्के विश्वम्भरां पालयति, योगी कश्चिदुज्जयिनीं प्रत्यागच्छत् । स च वेदवेदाङ्गवित् सकलशास्त्रप्रवीणः। किं बहुना? सः साक्षात् सर्वज्ञ एव । एकदा विक्रमः तस्य परमां ख्यातिं निशम्य तमाह्वातुं पुरोहितं त्रिविक्रमं प्रेषयामास।

9. **रिक्तस्थानानि पूरयत।** 3

1. आहारशुद्धौ ________ ।
2. राजा बन्धुः ________ ।
3. कुमारसम्भवं ________ विरचितम्।

10. **त्रयाणां पर्यायपदानि लिखत।** 3

1. गजाननः 2. कोविदः 3. द्विजः 4. मतिः

11. **त्रयाणां विरुद्धपदानि लिखत।** 3

1. सुराः 2. सृष्टिः 3. बन्धनम् 4. भद्रम्

12. **त्रीणि पदानि संस्कृतवाक्येषु योजयत।** 3

1. अस्मात् 2. प्राक् 3. साधयामि 4. नमः

13. **त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत।** 3

1. अथैकस्मिन् 2. केयम् 3. अतस्तस्य 4. जगद्गुरुः

14. **वाक्यदोषं परिहरत। (त्रयाणाम् एव)** 3

1. भवान् गच्छ। 2. रामः सीता च पठति।
3. शिशुः शुनकः बिभेति। 4. गुरुः नमः।

15. **सुबन्त-तिङन्त-अव्ययानि पृथक् कृत्वा लिखत।** 3

1. महाराजं प्रणिपत्य विज्ञापयति स्म।
2. ततो राजा विष्णुशर्माणमाहूय प्रोवाच।
3. न पराभवमाप्नोति शक्रादपि कदाचन।

16. **लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत। (त्रयाणामेव)** 6

1. उद्योगिनं -------- लक्ष्मीः। 3. चक्रारपङ्क्तिरिव -------- भाग्यपङ्क्तिः।
2. क्लेशः ------ विधत्ते। 4. यादृशं -------- तादृशी।

**17. संयोज्य लिखत ।** **4**

| अ | आ |
|---|---|
| अपठत् | लोट् |
| निन्दन्तु | लट् |
| क्षीये | विधिलिङ् |
| वदेयुः | लङ् |

**18. रेखाङ्कितपदमधिकृत्य प्रश्नवाक्यं कुरुत।** **2**

1. मल्लस्य नाम <u>वज्रजङ्घ</u> इति । 2. सीतया <u>शाला</u> गता ।

**19. समूहेतरपदं पृथक् कृत्वा लिखत।** **2**

1. पठ, लिख, वद, नमतु । 2. रामाय, गणेशाय, रवये, विहाय ।

**20. चतुर्थपदं लिखत।** **2**

1. बाल इति - लोपः :: मुनिस्सः – ----- ।

2. अं + जनम् – अञ्जनम् :: इं + धनम् - ---- ।

**21. प्रयोगपरिवर्तनं कुरुत।** **2**

1. अहं भोजनं करोमि । 2. तेन पूजा न कृता ।

--------------------